विष्वक्सेनाय दातव्यं नैवेद्यं तच्छतांशकम्।
पादोदकं प्रसादञ्च लिङ्गे चण्डेश्वराय च ॥ * ॥
तद्विधिश्चोक्तः।
सुख्यादीशानतः पात्रान्नैवेद्यांशं समुद्धरेत्।
सर्व्वदेवस्वरूपाय पराय परमेष्ठिने ॥
श्रीकृष्णसेवायुक्ताय विष्वक्सेनाय ते नमः।
इत्युक्त्वा श्रीहरेर्वामे तीर्थक्लिन्नं समर्पयेत्।
शतांशं वा सहस्रांशमन्यथा निष्फलं भवेत् ॥
पश्चाच्च बलिरित्यादिश्लोकावुच्चार्य्य वैष्णवः।
सर्व्वेभ्यो वैष्णवेभ्यस्तं शतांशं विनिवेदयेत् ॥ * ॥
तौ च श्लोकौ।
बलिर्विभीषणो भीमः कपिलो नारदोऽर्ज्जुनः।
प्रह्लादश्चाम्बरीषश्च वसुर्वायुसुतः शिवः ॥
विष्वक्सेनोद्धवाक्रूराः सनकाद्याः शुकादयः।
श्रीकृष्णस्य प्रसादोऽयं सर्व्वे गृह्णन्तु वैष्णवाः ॥ इति।
इदं यद्यपि युज्येत दर्पणार्पणतः परम्।
तथापि भक्तवात्सल्यात् कृष्णस्यात्रापि सम्भवेत्।
अथ बलिदानमाहात्म्यम्। नारसिंहे।
ततस्तदन्नशेषेण पार्षदेभ्यः समन्ततः।
पुष्पाक्षतैर्विमिश्रेण बलिं यस्तु प्रयच्छति ॥
बलिना वैष्णवेनाथ तृप्ताः सन्तो दिवौकसः।
शान्तिं तस्य प्रयच्छन्ति श्रियमारोग्यमेव च ॥”
इति श्रीहरिभक्तिविलासे ८ विलासः ॥

देवोद्देशेन यथाविधिपूजोपहारत्यागः। दुर्गादिदेवतोद्देशेन सङ्कल्पपूर्व्वकच्छागादिपशुघातनम्। यथा,—
“बलिदानेन सततं जयेच्छत्रून् नृपान् नृप ! ॥”
इति कालिकापुराणम् ॥
अस्य विधिनिषेधौ बलिशब्दे द्रष्टव्यौ ॥ * ॥
अथ बलिदानक्रमः। स्वयमुत्तराभिमुखः पूर्व्वाभिमुखं बलिं अव्यग्रावयवं सुन्दरं हृष्टपुष्टं माल्यं कण्ठे वेष्टयित्वा स्नातं समानीय कृताञ्जलिः पठेत्।
“ॐ वाराही यमुना गङ्गा करतोया सरस्वती।
कावेरी चन्द्रभागा च सिन्धुर्भैरवसागराः ॥
पशुस्नानविधानाय सान्निध्यमिह कल्पय ॥”
इति तीर्थान्यावाह्य ॐ अग्निः पशुरासीत्तेनायजन्त स एतल्लोकमजयत्तस्मिन्नग्निः स ते लोको भविष्यति तं जेष्यसि पिबैता अपः। ॐ वायुः पशुरासीत्तेनायजन्त स एतल्लोकमजयत्तस्मिन् वायुः स ते लोको भविष्यति तं जेष्यसि पिबैता अपः। ॐ सूर्य्यः पशुरासीत्तेनायजन्त स एतल्लोकमजयत् तस्मिन् सूर्य्यः स ते लोको भविष्यति तं जेष्यसि पिबैता अपः। ॐ वाचन्ते शुन्धामि प्राणांस्ते शुन्धामि श्रोत्रन्ते शुन्धामि मेढ्रन्ते शुन्धामि पायुन्ते शुन्धामि। मनस्त आप्यायतां वाक् त आप्यायतां प्राणस्त आप्यायतां चक्षुस्त आप्यायतां श्रोत्रन्त आप्यायतां यत्ते क्रूरं यदा स्थितं तत्त आप्यायतां तत्ते निष्टायतां तत्ते शुध्यतु शमहोभ्यः स्वाहा। इति मन्त्रैः स्नापयित्वा ॐ मेषाकारस्तम्भमध्ये पशुं बन्धय बन्धय सर्व्वाङ्गाद्यवयवं पशुं बन्धय बन्धय ब्रह्माण्डखण्डरूपस्तम्भे पशुं बन्धय बन्धय हुः फट् स्वाहा ॐ ह्रां ह्रीं ह्रूं चां चण्डिकायै इमं पशुं प्रोक्षामि स्वाहा। इति प्रोक्षणम्। ततः सर्व्वाङ्गाद्यवयवं पशुं मोक्षं कुरु कुरु स्वाहेति मोक्षं कृत्वा चमस्वेति ललाटे सिन्दूरं दत्त्वा ॐ छागपशवे नम इति पाद्यादिकं दत्त्वा एतदधिपतये ॐ अग्नये नमः एतत्सम्प्रदानीयायै ह्रीं दुर्गायै नमः इति पुष्पं दत्त्वा पश्वोरङ्गदेवताः पूजयेत्। यथा, शिरसि ॐ रुधिरवदनायै नमः ललाटे ॐ शाङ्करिण्यै नमः भ्रूमध्ये ॐ भद्रायै नमः चक्षुषोः ॐ त्रिनेत्रायै नमः कर्णयोः ॐ पार्व्वत्यै नमः घ्राणे ॐ गौर्य्यै नमः चिबुके ॐ चण्डिकायै नमः दन्तपङ्क्तौ ॐ उग्रचण्डिकायै नमः जिह्वायां ॐ चण्डघण्टायै नमः मुखे ॐ विरूपाक्षायै नमः ग्रीवायां ॐ चण्डायै नमः। पृष्ठे ॐ महाभैरव्यै नमः उदरे ॐ वैष्णव्यै नमः चतुष्पदे ॐ चण्डप्रियायै नमः पार्श्वयोः ॐ सर्व्वैश्वर्य्यै नमः कटिदेशे ॐ विरूपाक्षायै नमः खराग्रे ॐ कौशिक्यै नमः लाङ्गूले ॐ प्रहर्षिण्यै नमः सर्व्वाङ्गेषु पञ्चषिष्टाष्टदेवताभ्यो नमः। इति संपूज्य उत्सृजेत्। विष्णुः ॐ तत् सदद्याश्विने मासि शुक्ले पक्षे अमुकतिथौ वार्षिकशरत्कालीनदुर्गामहोत्सवे अमुकगोत्रस्य श्रीअमुकस्य दुर्गाप्रीतिकामनया दुर्गादेव्यै इमं पशुं वह्निदैवतं तुभ्यमहं घातयिष्यामि इत्युत्सृज्य कृताञ्जलिः पठेत्।
“ॐ छाग ! त्वं बलिरूपेण मम भाग्यादुपस्थितः।
प्रणमामि ततः सर्व्वरूपिणं बलिरूपिणम् ॥
यज्ञार्थे पशवः सृष्टाः स्वयमेव स्वयम्भुवा।
अतस्त्वां घातयिष्यामि तस्माद्यज्ञे वधोऽवधः ॥
पशुयोनिप्रसूतोऽसि पूजाहोमादिकर्म्मसु।
तुष्टा भवतु सा देवी सरक्तपिशितैस्तव ॥
चण्डिकाप्रीतिदानेन दातुरापद्विनाशनः।
चामुण्डाबलिरूपाय बले ! तुभ्यं नमोऽस्तु ते ॥”
ततः “पशुपाशाय विद्महे शिरश्छेदाय धीमहि।
तन्नः पशुः प्रचोदयात्।” इति कर्णे जपेत्। ततः खड्गमानीय ह्रीं इति बीजाक्षरं लिखित्वा ध्यायेत्।
“कृष्णं पिनाकपाणिञ्च कालरात्रिस्वरूपिणम्।
उग्रं रक्तास्यनयनं रक्तमाल्यानुलेपनम् ॥
रक्ताम्बरधरञ्चैव पाशहस्तं कुटुम्बिनम्।
पिबमानञ्च रुधिरं भुञ्जानं क्रव्यसंहतिम् ॥”
एवं खड्गं ध्यात्वा गृहीत्वा,
“ॐ रसना त्वं चण्डिकायाः सुरलोकप्रसाधकः।”
इत्यभिमन्त्र्य ऐं ह्रीं खड्गाय नम इति पाद्यादिभिः संपूज्य पुनर्मुष्टौ ॐ महादेवाय नमः। धारे ॐ यमाय नमः। अग्रे ॐ ब्रह्मणे नमः।
“ॐ असिर्विशसनः खड्गस्तीक्ष्णधारो दुरासदः।
श्रीगर्भो विजयश्चैव धर्म्मपाल ! नमोऽस्तु ते ॥
इत्यष्टौ तव नामानि स्वयमुक्तानि वेधसा।
नक्षत्रं कृत्तिका तुभ्यं गुरुर्देवो महेश्वरः ॥
हिरण्यञ्च शरीरन्ते धाता देवो जनार्द्दनः।
पिता पितामहो देवस्त्वं मां पालय सर्व्वदा ॥
नीलजीमूतसङ्काशस्तीक्ष्णदंष्ट्रः कृशोदरः।
भावशुद्धो मर्षणश्च अतितेजास्तथैव च ॥”
ॐ तीक्ष्णदंष्ट्राय नम इति पुष्पं दत्त्वा आं ह्रीं फट् इति खड्गमादाय ॐ कालि कालि वज्रेश्वरि लौहदण्डायै नम इति जपित्वा छागस्य ग्रीवायां खड्ग ! त्वं शीघ्रं छिन्धि छिन्धि फट् फट् स्वाहा। इति पूर्व्वाभिमुखं बलिं स्वयमुत्तरामुखः उत्तराभिमुखं बलिं स्वयं पूर्व्वाभिमुखो वा सकृत्प्रहारेण छिन्द्यात्। ततो मृण्मयादिपात्रे रुधिरमादाय चतुर्भागं कृत्वा ऐशान्यां ॐ विदारिकायै नमः आग्नेय्यां ॐ पूतनायै नमः नैरृत्यां ॐ पापराक्षस्यै नमः वायव्यां ॐ कौशिक्यै नमः। ॐ तत् सदद्यामुके मासि अमुकपक्षेऽमुकतिथौ वार्षिकशरत्कालीनदुर्गामहोत्सवे अमुकगोत्रस्य श्रीअमुकस्य दशवर्षावच्छिन्नश्रीदुर्गाप्रीतिकामः श्रीदुर्गादेव्यै छागपशुरुधिरं दास्यामि इति सङ्कल्प्य।
ॐ कालि कालि महाकालि कालिके पापनाशिनि।
शोणितञ्च बलिं गृह्ण वरदे वामलोचने ॥”
एष रुधिरबलिः ॐ इत्ययमिति मन्त्रेण दद्यात्। ततः ऐं ह्रीं श्रीं कौशिकि रुधिरेणाप्यायतामिति वदेत्। ततः शिरसि ज्वलद्दशां दत्त्वा ॐ तत् सदद्यामुके मास्यमुकपक्षेऽमुकतिथौ वार्षिकशरत्कालीनदुर्गामहोत्सवे अमुकगोत्रस्य श्रीअमुकस्य श्रीमद्दुर्गादर्शनाभिवन्दनस्पर्शनाभिपूजनस्नपनतर्पणजनितपूर्व्वपूर्व्वाधिकपुण्यप्राप्तिकामो दुर्गादेव्यै सप्रदीपच्छागपशुशीर्षं दास्यामीति सङ्कल्प्य एष सप्रदीपच्छागपशुशीर्षबलिः ह्रीं दुर्गायै नम इत्युत्सृजेत्।
“ॐ जय त्वं सर्व्वभूतेशे सर्व्वभूतसमावृते।
रक्ष मां निजभूतेभ्यो बलिं भुङ्क्ष्व नमोऽस्तु ते ॥
ततः खड्गरुधिरमादाय।
“ॐ यं यं स्पृशामि पादेन यं यं पश्यामि चक्षुषा।
स स मे वश्यतां यातु यदि शक्रसमो भवेत् ॥”
इति ललाटे तिलकं कुर्य्यात्। मेषघाते तु मेषित्यूहेन योज्यम्। मेषरुधिरदाने तु एकवर्षावच्छिन्नदुर्गाप्रीतिकामः। प्रभूतबलिदाने तु द्वौ वा त्रीन् वा अग्रतः कृत्वा संप्रोक्ष्य तत्तत्पशुभ्यो नम इति संपूज्य छाग त्वमित्येकवचनानूहेन प्रयोगः। पश्वन्तरेऽप्येवम्। वाक्ये तु एतान् पशून् तुभ्यमहं घातयिष्ये। रुधिरदाने तु एतान् रुधिरबलीन् दास्यामि इति सङ्कल्प्य प्रत्येकेन दद्यात् शीर्षदानमप्येवम्। ततो मूलमन्त्रं यथाशक्ति जप्त्वा समर्प्य प्रणमेदिति नन्दिकेश्वरपुराणोक्तपद्धतिः ॥ * ॥